दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्दः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णद्वितीया
ज्येष्ठ १९ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-६ ■ वर्ष-५ ■ अङ्क-२२० | १ | जून ०२, २०२६ | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

२ नवदिल्ल्यां जून-मासस्य ११ दिनाङ्कतः १३ तमस्य ब्रिक्स (BRICS) नगरीकरण-मञ्चस्य आयोजनम्, भारतं करिष्यति आतिथ्यम्

३ एच.आर.टी.सी. कर्मचारिणः प्राप्स्यन्तः वेतनम्, सङ्घेन यानरोधनस्य उद्घोषणा स्थगिता

६ राज्यपाल-सह-कुलाधिपतिना उच्चशिक्षायाः गुणवत्ता-परिष्कारायः निर्णायकः निर्देशः दत्तः – २११ नूतन-उपाधि-महाविद्यालयानां २०२६ तमवर्षस्य जुलै-मासस्य प्रथमे दिनाङ्के आरम्भस्य लक्ष्यनिर्धारणम्

## प्रधानमन्त्री नरेन्द्र मोदी म्यांमारस्य राष्ट्रपतिः ऊ मिन आऊं लाइन् च नव-दिल्ल्यां द्विपक्षीयोपवेशनं कृतवन्तौ



प्रधानमन्त्री नरेन्द्र मोदी म्यांमारयाः राष्ट्रपतिः ऊ मिन आऊं लाइन् च गतदिने नव-दिल्ल्यां द्विपक्षीयोपवेशनं कृतवन्तौ। उभयोः मध्ये ऐतिहासिक सभ्यतागत सम्बन्धान् इतोपि सुदृढीकर्तुं वार्ता अभवत् । संवादे म्यांमा-भारतदेशयोः मिथः सुरक्षां सम्पर्क च समेत्य देशद्वयोः सन्बन्धानां समेपि पक्षाः चर्चिताः। उपवेशनस्य अनन्तरं विदेशसचिवः विक्रम मिसरी अवोचत् यत् देश द्वयेन विदेश-व्यवहार-विकास-शिक्षा, स्वास्थ्यादि विषयेषु कार्याचरणाय साहमत्यं प्रकटितम्। अस्माकं वार्ताहरेण सूचितं यत् म्यांमा-देशस्य राष्ट्रपतिः गतदिनेसायं राष्ट्रपति-भवने राष्ट्रपतिना द्रौपदी-मुर्मु-वर्यया सह मेलनं करिष्यति।

## प्रधानमन्त्री स्वनिधि योजनायाः षड्वर्षपूर्त्यावसरे प्रधानमन्त्री अवोचत् यत् अनया योजनया पथ व्यवसायिभ्यः प्रगतेः नूतनावसराः प्रदत्ताः

प्रधानमन्त्री स्वनिधि योजनायाः षड्वर्षपूर्ती प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् अनया योजनया पथ व्यवसायिभ्यः प्रगतेः नूतनावसराः प्रदत्ताः। श्रीमोदी अस्याः योजनायाः प्रशंसां कृत्वा अवदत् यत् पीएम स्वनिधि योजनाया प्रतिभूर्ति बिना ऋणप्रदानम्, वित्तीय समावेशनं अपि च विकास्य नवीन-अवसराः प्रदत्ताः येन लक्षशः पथविक्रेतृ-जनानां जीवने उन्नतिः जाता।

## पश्चिम बंगालस्य मुख्यमंत्री शुभेंदु-अधिकारी गतदिने मंत्रिमण्डलस्य विस्तारं विधाय पञ्चत्रिंशत् नूतन-मंत्रिभ्यः मन्त्रिमण्डले स्थानम् अयच्छत्

पश्चिम बंगालस्य मुख्यमंत्री शुभेंदु-अधिकारी गतदिनेमंत्रिमण्डलस्य विस्तारं अकरोत्। राज्यपालः आर. एन. रविः कोलकातायाः लोकभवने आयोजिते समारोहे पञ्चत्रिंशत् नूतन मंत्रिभ्यः पदस्य गोपनीयतायाः च शपथग्रहणं कारितवान्। समारोहे मुख्यमंत्री वर्येण सह अन्य वरिष्ठनेतारः अपि उपस्थिताः आसन्। नवनियुक्त मंत्रिभ्यः विभागानां आवंटनं अनन्तरं भविष्यति । शपथग्रहण समारोहे स्वपनदास गुप्ता, अर्जुनसिंहः, तापसरायः, शकरघोषः च शपथवचनं स्वीकृतवन्तः

## भारत-ओमान-व्यापकार्थिक-सहभागितासन्धिः सी.ई.पी.ए. इति गतदिनेक्रियान्वितः अभवत्



भारत-ओमान-व्यापकार्थिक-सहभागितासन्धिः सी.ई.पी.ए. इति गतदिनेक्रियान्वितः अभवत् । वाणिज्योद्योग-मन्त्री पीयूष गोयलः अवोचत् यत् अयं सन्धिः देशद्वयस्य आर्थिक-रणनीतिक-सम्बन्धान् दृढयिष्यति। एकस्मिन् राष्ट्रिय दैनिक-पत्रे प्रकाशिते लेखे श्री-गोयलः अवोचत् यत् अयं सन्धिः नूतनापणम् उद्घाटयिष्यति। अनेन निर्याते वृद्धिः भविष्यति निवेशः अपि वृद्धिं यास्यति। व्यापकार्थिक-सहभागिता-सन्धेः अन्तर्गतं भारतीय-निर्यातकेभ्यः ओमाने उत्पाद-समूहेषु विपणौ प्रतिशतम् अष्टनवतिमिता शुल्क-मुक्तकार्यानुमतिः भविष्यति। श्रीगोयलेन उक्तं यत् अनेन आजीविकासंवर्धनाय विद्यार्थिभ्यः श्रमिकेभ्यः महिलाभ्यः कृषकेभ्यः मत्स्यजीविभ्यः सूक्ष्मलघुमध्यमोद्यमेभ्यः च महत्त्वपूर्णं रूपेण लाभो भविष्यति।

## भारत-ऑस्ट्रेलिया- देशयोः रक्षामंत्रिणोः द्वितीय-संवादोपवेशनम् नवदिल्ल्याम् अभवत्

भारत-ऑस्ट्रेलिया- देशयोः रक्षामंत्रिणोः द्वितीय-संवादोपवेशनम् नवदिल्ल्याम् अभवत्। रक्षामंत्री राजनाथसिंहः अथ च ऑस्ट्रेलियादेशस्य उपप्रधानमन्त्री रक्षामंत्रिश्च रिचर्ड-मार्ल्सः उपवेशनस्य अध्यक्षतां कृतवन्तौ। श्रीसिंहेन प्रोक्तम् यत् उपवेशनावधौ भारत-ऑस्ट्रेलिया-देशयोर्मध्ये सुरक्षा-संबंधः सुदृढः अभवत्। श्रीमार्ल्स अवादीत् यत् ऑस्ट्रेलिया भारत देशौ रक्षा-सहभागितां सुदृढः अकुरुताम्। देश द्वयं सामुद्रिक-क्षेत्रे मिलित्वा कार्यं करिष्यतः। वार्तायां द्विपक्षीय-रक्षा-सहयोग-विषये प्रगतिः समीक्षिता। यया सहभागितायाः नूतन मार्गस्य अन्वेषणं भविष्यति।

## जलशक्तिमन्त्रि सी-आर-पाटिलः विज्ञानप्रौद्योगिकी मन्त्री जितेन्द्र सिंह च जलानुसंन्धानविकास सम्बद्धां कार्यशालां उद्घाटितवन्तौ




जलशक्तिमन्त्रि सी-आर-पाटिलः विज्ञानप्रौद्योगिकी मन्त्री जितेन्द्र सिंह च गतदिने राजधान्यां नवदिल्ल्यां जलानुसंन्धानविकास सम्बद्धां कार्यशालां उद्घाटितवन्तौ । अत्रावसरे श्री पाटिलः अवदत् यत् अस्यां कार्यशालायां जलसङ्कटस्य समाधानेषु व्यापक विचार-विमर्शो विधीयते । अस्मिन् अवसरे जलशक्ति मन्त्रालयेन इसरो इत्यनेन च जलसंसाधनानाम् आकलनाय प्रबन्धनाय च उपग्रहाधारितानुप्रयोगम् उन्नत प्रौद्योगिकीं च दृढयितुं सन्धिः हस्ताक्षरितः ।

## सर्वोच्च न्यायालये पञ्च न्यायाधीशानां नियुक्तिः

सर्वोच्च न्यायालये पञ्च न्यायाधीशानां नियुक्तिः कृता। अनेन सहैव मुख्य न्यायाधीशं समेत्य न्यायाधीशानां सङ्ख्या सप्तत्रिंशत् संवृत्ता। विधि-न्यायमन्त्री अर्जुन राम मेघवालः सामाजिक-संचार-पटले अवोचत् यत् राष्ट्रपतिना मुख्य न्यायाधीशस्य परामर्शानन्तरं सर्वोच्च-न्यायालये पञ्च नूतन न्यायाधीशानां नियुक्तिः कृता। अवधेयं यत् केन्द्र-प्रशासनेन विगते मासे एकम् अध्यादेशं प्रस्तूय विधौ संशोधनं कृतमासीत्।

## सुभाषितम्

**दूरस्थोऽपि न दूरस्थो, यो यस्य मनसि स्थितः।**
**यो यस्य हृदये नास्ति, समीपस्थोऽपि दूरतः।।**

भावार्थः- यदि किसी व्यक्ति के मन में किसी दूरस्थ स्थान में रहने वाला व्यक्ति समाया हुआ हो तो वह उससे दूर रहते हुए भी उससे (मानसिक रूप से) दूर नहीं होता, परन्तु यदि उस व्यक्ति के लिए उस के हृदय में कोई स्थान नहीं हो तो वह उसके निकट रहते हुए भी दूर रहने के समान है।




## व्यावसायिक-प्रतिष्ठानेषु प्रयुज्यमानस्य नवदश किलोग्राम भारमितस्य एल.पी.जी. इति वातिभाण्डस्य मूल्ये वृद्धिः सञ्जाता

व्यावसायिक-प्रतिष्ठानेषु प्रयुज्यमानस्य नवदश किलोग्राम भारमितस्य एल.पी.जी. इति वातिभाण्डस्य मूल्ये वृद्धिः सञ्जाता। परं गृहेषु प्रयुज्यमानस्य एल.पी.जी. इति वातिभाण्डस्य मूल्ये परिवर्तनं नैव कृतम्। अवधेयम् यत् वैश्विक परिदृश्ये तैलमूल्येषु अस्थिरता कारणेन इयं वृद्धिः जाता। पश्चिमेशियायाम् अमरीका-ईरानयोः गतिरोधः अपि अपरं मूल्यवृद्धि- कारणं वर्तते।

# नवदिल्ल्यां जून-मासस्य ११ दिनाङ्कतः १३ तमस्य ब्रिक्स (BRICS) नगरीकरण-मञ्चस्य आयोजनम्, भारतं करिष्यति आतिथ्यम्




भारतं जून-मासस्य ११ दिनाङ्कतः नवदिल्ल्यां दिवसद्वयात्मकस्य १३ तमस्य ब्रिक्स-नगरीकरण-मञ्चस्य (BRICS Urbanisation Forum) आतिथ्यं करिष्यति। अस्य नगरीकरण-मञ्चस्य मुख्यविषयः 'जनानां कृते नगराणिः समावेशी तथा लचीले (परिवर्तनशीले) नगरीय-भविष्याय ब्रिक्स-सहयोगः' इति भविष्यति। आवास-एवं-नगरीयकार्यमंत्री मनोहर लालः नवदिल्ल्यां पत्रकार-सम्मेलने इमां घोषणाम् अकरोत्।श्री मनोहर लालः अवदत् यत् इदं भारतस्य तं दृष्टिकोणं दर्शयति यः नगराणां योजनासु, शासने, विकासे च जनानां महत्त्वं ददाति। तेन उक्तं यत् अस्य आयोजनं तादृशे समये भवति, यदा बहवः ब्रिक्स-देशाः तीव्रेण नगरीय-विकासेन सह गच्छन्तः सन्ति, तथा च आवास-गतिशीलता-जलवायुजोखिम (ऋतुपरिवर्तन-संकट)-नगरपालिकाक्षमता-नगरीयवित्त-सेवावितरणम् इत्यादीनां सामान्यानां आव्हानानां सामनां कुर्वन्तः सन्ति।अस्मिन् वर्षे १३ तमेन ब्रिक्स-नगरीकरण-मञ्चेन सह भारतं चतुर्थवारम् अस्य आतिथ्यं करोति। स्वस्य स्थापनाकालात् आरभ्य इदं ब्रिक्स-देशानां कृते नगरीय-नीतेः आदान-प्रदानाय तथा महानगराणां विकासाय सम्बन्धितानां सुझावानां (परामर्शाणाम्) दानाय एकस्य मन्त्रिस्तरीय-मञ्चस्य रूपेण कार्यं करोति।

# नगरनिगमनिर्वाचनस्य परिणामाः घोषिताः, किन्तु महापौरपदस्य कृते आरक्षणसूचिका (रोस्टर) अद्यापि अनिर्णीता



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य चतुर्णां नगरनिगमानां निर्वाचनपरिणामाः सर्वजनसमक्षं घोषिताः सन्ति, येन ६३ वार्डेभ्यः (निर्वाचनक्षेत्रेभ्यः) नवीनाः पार्षदाः निर्वाचिताः अभवन्। अस्मिन् एव समये, इदानीं सर्वेषां राजनैतिकदलानां, नवनिर्वाचितानां पार्षदानां, सम्भाव्यदावेदाराणां च दृष्टिः महापौरपदस्य आरक्षणतालिकायाः निर्धारणस्य उपरि स्थिरा जाता। यद्यपि सम्पूर्णानिर्वाचनप्रक्रिया साफल्येन समाप्ता, तथापि राज्यशासनेन (सर्वकारेण) अद्यापि महापौरपदस्य आरक्षण-सम्बन्धिनी सूचिका न प्रसारिता। एतस्मात् कारणात् राजनैतिकक्षेत्रेषु विविधाः चर्चाः, तर्काः, ऊहापोहप्रसङ्गाः च अतीव तीव्राः सञ्जाताः। नगरनिगमेषु महापौरपदं स्थानीयराजनीतेः सर्वोच्चं प्रतिष्ठितं च पदं मन्यते। अत एव परिणाम- घोषणायाः अनन्तरम् इदानीं सर्वत्र एषः एव महाप्रश्नः वर्तते यत् एतेषु चतुर्षु नगरनिगमेषु महापौरस्य आसन्दं (कुर्सी) कस्मै वर्गाय आरक्षितं भविष्यति। आरक्षणतालिकायाः अप्रसारणात् बहवः आकांक्षिणः नेतारः राजनैतिकदलाश्च स्वकीयां चणक्यनीतिं वा अन्तिमां योजनां निश्चितं कर्तुं न शक्नुवन्ति। यदा निर्वाचनस्य समयसारणी घोषिता आसीत्, तदापि महापौरपदस्य आरक्षणविषये स्थितिः स्पष्टा नासीत्। तस्मिन् समये अपि विभिन्नराजनैतिकदलैः प्रत्याशिभिश्च सर्वकारात् शीघ्रमेव आरक्षणसूचिकां प्रकटीकर्तुं याचना कृता आसीत्। इदानीं तु यदा मतपरिणामाः अपि आगताः, तथापि स्थितिः तथैव अनिर्णीता वर्तते। अनेन निर्वाचितानां पार्षदानां मनसि अपि भविष्यं प्रति महती अनिश्चितता व्याप्ता अस्ति। नगरनिगमानां राजनैतिकसमीकरणे आरक्षणरोस्टर- व्यवस्था प्रमुखां निर्णायकभूमिकां वहति। अस्याः व्यवस्थायाः आधारेण एव इयं रूपरेखा सिद्ध्यति यत् कस्य वर्गस्य पार्षदाः महापौरपदस्य प्रतिस्पर्धायां सम्मिलितुं योग्याः भविष्यन्ति। अतः अस्याः सूचिकायाः प्रकाशनात् परमेव वास्तविकं राजनैतिकदृश्यं सम्मुखं आगमिष्यति, दलानां आन्तरिकनेतृत्वमन्थनं च तीव्रगतिं प्राप्स्यति।

**कार्यकालस्य पञ्चवर्षात्मकत्वेन पदस्य महत्त्वे महती वृद्धिः-**

अस्मिन् काले इयं स्थितिः विशेषरूपेण गम्भीरा वर्तते यतोहि प्रदेशसर्वकारेण सद्यः एव नगरनिगममहापौरस्य सेवाकालः सार्धद्विवर्षात् वर्धयित्वा पूर्णपञ्चवर्षाणि यावत् कृतः। कार्यकालस्य पञ्चवर्षात्मकत्वेन अस्य पदस्य राजनैतिकगरिमा प्रभावशीलता च द्विगुणिता सञ्जाता। पूर्वं सार्धद्विवर्षीयकार्यकालस्य कारणात् नेतृत्वपरिवर्तनस्य सम्भावना सदैव भवति स्म, किन्तु साम्प्रतम् एकवारं चितः महापौरः सम्पूर्णं पञ्चवर्षीयं कालं यावत् नगरनिगमस्य कुशलं नेतृत्वं विधास्यति। नगरीयविकासविभागस्य (शहरी विकास विभाग) अनुसारं महापौरस्य आरक्षणतालिकायाः निर्माणप्रक्रिया स्वकीये अन्तिमे चरणे वर्तते। विभागेन एतदर्थं प्रारूपं (प्रस्तावं) सज्जीकृत्य न्यायविभागं (विधि विभाग) प्रति परामर्शाय प्रेषितम् अस्ति।

## सर्वेषां परिणामानां प्रकाशनेन सह एव आचारसंहितायाः समाप्तिः भविष्यति

हिमाचलप्रदेशे पञ्चायतीराजसंस्थानां नगरीयनिकायनां च सामान्यानां निर्वाचनानां कारणात् आदर्श-निर्वाचन-आचारसंहिता (मॉडल कोड ऑफ कंडक्ट) प्रवृत्ता आसीत्। इयं आचारसंहिता जिलापरिषदः सर्वेषां परिणामानां घोषणायाः अनन्तरं सोमवासरे स्वतः एव समाप्ता भविष्यति। राज्यनिर्वाचनआयोगः सम्पूर्णनिर्वाचनप्रक्रियायाः समाप्त्याः अनन्तरं तस्याः निष्कासनस्य आधिकारिकाम् अधिसूचनां (नोटिफिकेशन) शीघ्रमेव प्रसारयिष्यति।

आचारसंहितायाः विगमनेन प्रदेशे अवरुद्धानां विकासात्मककार्याणां गतिः पुनः वर्धिष्यते इति दृढः विश्वासः वर्तते। सर्वकारीयविभागानां समीपे याः प्रस्ताविताः योजनाः लम्बाः परियोजनाः च आसन्, तासाम् उपरि इदानीं त्वरितगत्या निर्णयाः स्वीकर्तुं शक्ष्यन्ते। अनेन सह एव, शिक्षाविभागेन सम्बद्धस्य केन्द्रीय- माध्यमिक- शिक्षाबोर्ड-संस्थायाः विद्यालयेषु ६२०० शिक्षकाणां नियुक्तिप्रक्रियायाः मार्गः अपि पूर्णरूपेण निष्कण्टकः (प्रशस्तः) भविष्यति।

# वस्तु-सेवाकरस्य संकलसंग्रहः विगतमासे त्रि-दशलव द्वि प्रतिशतं संवर्ध्य एकलक्ष्य चतुर्नवतिसहस्रकोटि -रुप्याधिकः अभवत्




वस्तु-सेवाकरस्य संकलसंग्रहः विगतमासे त्रि-दशलव द्वि प्रतिशतं संवर्ध्य एकलक्ष्य चतुर्नवतिसहस्रकोटि -रुप्याधिकः अभवत्। विगत वर्षे मई-मासे संग्रहः एकलक्ष-अष्टाशीतिसहस्र कोटिरुप्यकाणि असीत्। गतमासे केन्द्रीय-वस्तु-सेवा करस्य सकलसंग्रहः सप्तत्रिंशत् सहस्र-सप्त-नवत्याधिक त्रिशतम् कोटि-रुप्यकाणि अपि च राज्य-वस्तु-सेवाकरस्य सकल-संग्रहः पञ्च-चत्वारिंशत्-सहस्र-त्रि-चत्वारिंशत्यधिक-शतम् कोटि-रुप्यकाणि आसीत्। एकीकृत-वस्तु-सेवा-करस्य संग्रहः एकपञ्चाशत् सहस्र नवत्यधिक नवशतम् कोटि रुप्यकाणि आसीत्।

# हांगकांग नगरे भारतेन दश स्वर्णपदकानि पञ्चरजतपदानि चत्वारि कांस्यपदकानि समेत्य नवदश पदकानि विजितानि



हांगकांग नगरे आयोजितां द्वाविंशतिः तमायाम् एशियामहाद्वीपीयायाम् अंडर-२० एथलेटिक्स चैंपियनशिप इति स्पर्धामालिकायां भारतेन दश स्वर्णपदकानि पञ्चरजतपदानि चत्वारि कांस्यपदकानि समेत्य नवदश पदकानि वजितानि। पदक तालिकायां भारतेन द्वितीय-स्थानं प्राप्तम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना द्वाविंशतिः तमायाम् एशियामहाद्वीपीयायाम् अंडर-२० एथलेटिक्स चैंपियनशिप इति स्पर्धामालिकायां दश स्वर्णपदकानि समेत्य नवदश पदकानि प्राप्तवयः भारतीयदलेभ्यः वर्धापनानि प्रदत्तानि ।

# कतिपयहोरासु एव भविष्यति भयानकजीवाणूनां परिचयः, ऐम्स- बिलासपुरे शीघ्रमेव स्थापयिष्यते यन्त्रम्




**हिमसंस्कृतवार्ताः- बिलासपुरम्।** ऐम्स-बिलासपुरनगरे इदानीं कतिपयहोरासु एव भयानकजीवाणूनां परिचयः (ज्ञानं) भवितुं शक्ष्यति। सूक्ष्मजीवविज्ञानविभागे (माइक्रोबायोलॉजी विभाग) शीघ्रमेव आधुनिकं यन्त्रं 'वाइटेक २ कॉम्पैक्ट' (Vitek २ Compact) स्थापयितुं गच्छति। अस्मिन् यन्त्रे स्थापिते सति शरीरे विद्यमानानां भयानकानां जीवाणूनां परिचयः इदानीं दिनानां स्थाने केवलं कतिपयघण्टासु एव भविष्यति। अनेन रुग्णस्य चिकित्सा तत्क्षणमेव प्रारब्धुं शक्ष्यते।

## अस्य यन्त्रस्य द्वे मुख्ये कार्ये-

**प्रथमम्-** रुग्णस्य शरीरे रक्तस्य, मूत्रस्य वा पूयस्य (पस) प्रतिदर्शे (सैंपल) विद्यमानस्य रोगप्रसारकस्य कवककस्य (फंगस/जीवाणोः) पहिचानं करणम्।

**द्वितीयम्-** तस्य जीवाणोः समूलोन्मूलनाय का प्रतिजैविकदवा (एंटीबायोटिक) सर्वाधिक- प्रभावशालिनी भविष्यति का च प्रभावहीना, इति परीक्षणम्।

चिकित्साविज्ञानस्य भाषायाम् इदं 'ऑटोमेटेड बैक्टीरियल आईडी (आइडेंटिफिकेशन) एंड एएसटी (एंटीबायोटिक ससेप्टिबिलिटी टेस्टिंग)' इति उच्यते, यत् सङ्गणकः, रोबोटिक- प्रौद्योगिक्यां कार्यं करोति। पारम्परिकपद्धतेः अन्तरम्: यदा कस्यचित् रुग्णस्य शरीरे सङ्क्रमणं (इंफेक्शन) भवति, तदा जीवाणोः परिचयाय समीचीनौषधस्य ज्ञानाय च 'कल्चर' परीक्षणे न्यूनतमाः ४८ तः ७२ घण्टाः यावत् समयः लगति। तावत् पर्यन्तं चिकित्सकाः अनुमानेन एव ओषधिं दातुं प्रारभन्ते, परन्तु 'वाइटेक २ कॉम्पैक्ट' इत्यस्य आगमनेन सङ्क्रमणप्रसारकस्य अचूकजीवाणोः परिचयः कतिपयघण्टासु एव भविष्यति।

## रुग्णानां कृते अस्य साक्षात् उपयोगः-

यदा कस्मैचित् रुग्णाय सेप्सिस (रक्तसङ्क्रमणम्), यूटीआई (मूत्रमार्गसङ्क्रमणम्), मस्तिष्कावरणशोथः, अथवा तीव्रः फुफ्फुसशोथः (गंभीरनिमोनिया) सदृशाः प्राणघातकाः रोगाः भवन्ति, तदा प्रतिपलं मूल्यवान् भवति। अस्य यन्त्रस्य उपयोगेन रुग्णाय 'ट्रायल एंड एरर' (अनुमानेन औषधिदानस्य) कालात् न गन्तव्यं भविष्यति। रुग्णस्य शरीरे यः जीवाणुः भविष्यति, तस्य नाशाय अचूकौषधं प्रथमाद् दिनाद् एव प्रारप्स्यते। अनेन रुग्णस्य शरीरे ओषधीनां दुष्प्रभावाः अत्यन्तं न्यूनाः भविष्यन्ति, सः च शीघ्रमेव स्वस्थः भूत्वा स्वगृहं प्रवर्तिष्यते।

## हिमाचलस्य रुग्णानां कृते कः विशेषलाभः?

भौगोलिकदृष्ट्या कठिनपरिस्थितिषु स्थितानां हिमाचलप्रदेशस्य रुग्णानां कृते इदं यन्त्रं वरदानं सिद्धं भवितुं शक्नोति। इदानीं यावत् एतादृशाय उन्नत- स्वचालित- (एडवांस- ऑटोमेटेड) परीक्षणाय प्रदेशस्य दूरवर्तिभ्यः क्षेत्रेभ्यः आगन्तुकैः रुग्णैः चण्डीगढ-पीजीआई अथवा दिल्लीनगरं प्रति गन्तव्यं भवति स्म, अथवा अतीव बहुमूल्येषु निजी-चिकित्सालयेषु सहस्राणि रूप्यकाणि व्ययीकर्तव्यानि भवन्ति स्म। पर्वतीयक्षेत्रेषु समये प्रतिवेदनस्य (रिपोर्ट) अप्राप्त्या अनेकवारं सङ्क्रमणं सम्पूर्णशरीरे प्रसरति स्म। इदानीं बिलासपुर ऐम्स इत्यत्र एव एषा सुविधा उपलब्धत्वात् रुग्णाः महल्लाभं प्राप्स्यन्ति।

# एच.आर.टी.सी. कर्मचारिणः प्राप्वन्तः वेतनम्, सङ्घेन यानरोधनस्य उद्घोषणा स्थगिता



**हिमसंस्कृतवार्ताः - शिमला।** एच.आर.टी.सी.-कर्मचारिणः मासस्य प्रथमे दिनाङ्के एव वेतनं प्राप्तवन्तः। निगमप्रबन्धनेन प्रदेशस्य डिपो-कार्यालयेभ्यः वेतनार्थं सीमा (लिमिट) प्रसारिता आसीत्। ईदृशे समये १ जून दिनाङ्के एच.आर.टी.सी.-कर्मचारिणां वित्तकोषखातेषु वेतनम् आगतम्। अतः चालकसङ्घः (ड्राइवर यूनियन), परिचालकसङ्घः (कंडक्टर यूनियन), सर्वकर्मचारिसङ्घः, हिमाचलपरिवहनमजदूरसङ्घः तथा च अन्याः कर्मचारिसङ्घाः निगमप्रबन्धनाय २ जून दिनाङ्के राज्यव्यापी यानरोधनस्य (बसें खड़ी करने का) यां अन्तिम-उद्घोषणां दत्तवन्तः आसन्, तां सम्प्रति स्थगितं कृतवन्तः। किन्तु यदि आगामिनि जुलाई-मासे समयपालनेन प्रथमे दिनाङ्के वेतनं न प्राप्स्यते, तर्हि सङ्घस्य पदाधिकारिभिः पुनः यानरोधनस्य सङ्केतः दत्तः। एच.आर.टी.सी.-चालकसङ्घस्य अध्यक्षः मानसिंहठाकुरः अवदत् यत् प्रत्येकमासस्य प्रथमे दिनाङ्के कर्मचारिभ्यः वेतनं दातव्यम्। तेन कथितं यत् यदि समये वेतनं न प्राप्स्यते तर्हि यानानि रोधिष्यन्ते। मानसिंहठाकुरः प्रतिपादितवान् यत् समये वेतनप्राप्तिः तेषाम् अधिकारः वर्तते, तदर्थं वेतनयाचनायाः आवश्यकता न भवेत्। सः उक्तवान् यत् निगमस्य चालक-परिचालकेभ्यः सप्तवर्षाणां रात्रिकालीन-अतिसमय-वृत्तिः (overnight overtime) न प्राप्ता। ईदृशे समये चालकसङ्घेन निगमप्रबन्धनाय २४ दिनाङ्कपर्यन्तं समयः दत्तः, अस्मिन् समये च रात्रिकालीन-अतिसमय-वृत्या (नाइट ओवरटाइम) सह अन्यान् सर्वाः देयताः प्रदातुं अभ्यर्थना कृता। यदि एताः देयवृत्तयः न प्रदास्यन्ते, तर्हि २५ दिनाङ्कात् निगमस्य चालकाः परिचालकाश्च यानानि रोत्स्यन्ति। विशेषरूपेण उल्लेखनीयं यत् देयवृत्तीनां विषये २ जून दिनाङ्के निगमप्रबन्धनेन 'एच.आर.टी.सी. स्टेट कंडक्टर यूनियन' इत्यस्य उपवेशनमपि आहूतमस्ति। यस्मिन् परिचालकसङ्घः स्वकीयाः अभ्यर्थनाः निगमप्रबन्धस्य सम्मुखं स्थापयिष्यति, आन्दोलनस्य कृते सूचनापत्रम् (नोटिस) अपि प्रदातुं शक्नोति। अस्य उपवेशनस्य कृते राज्यव्यापी परिचालकसङ्घस्य पदाधिकारिणः शिमलां प्राप्स्यन्ति।

# प्रथमवारं 'राष्ट्रीय-शिक्षक-पुरस्कार-२०२६' इत्यस्मिन् सम्बद्धाः भविष्यन्ति महाविद्यालयीय-शिक्षकाः




**हिमसंस्कृतवार्ताः - शिमला।** केन्द्रीय-शिक्षा-मन्त्रालयेन 'राष्ट्रीय-शिक्षक-पुरस्कार-२०२६' इत्यस्य कृते प्रथमवारं उच्चशिक्षणसंस्थानां महाविद्यालयानां च शिक्षकाः अपि सम्मिलिताः कृताः। अस्य निर्णयस्य परं प्रदेशेन सह देशव्यापी महाविद्यालय-शिक्षकपुञ्जेषु उत्साहस्य वातावरणं वर्तते। सुदीर्घकालात् महाविद्यालय-शिक्षकान् राष्ट्रीयस्तरस्य अस्मिन् प्रतिष्ठिते सम्माने सम्मिलितं कर्तुं अभ्यर्थना उत्थाप्यमाना आसीत्, या अधुना केन्द्रसर्वकारेण पूरिता। इदानीं यावत् राष्ट्रीय-शिक्षक-पुरस्कारः मुख्यरूपेण विद्यालयीय-शिक्षायाः (स्कूल शिक्षा) सम्बद्धशिक्षकेष्वेव सीमितः आसीत्। अनेन कारणेन महाविद्यालेषु उच्चशिक्षणसंस्थासु च उत्कृष्टं कार्यं कुर्वन्तः शिक्षकाः अस्य सम्मानस्य कृते पात्राः न भवन्ति स्म। नवीनव्यवस्थायाः अन्तर्गतं उच्चशिक्षाक्षेत्रे नवोन्मेषाय (नवाचार), शोधकार्याय, शिक्षणगुणवत्तायै, छात्रहिते कृतेभ्यः कार्येभ्यः तथा च संस्थागतविकासे योगदानं दातृभ्यः शिक्षकेभ्यः अपि राष्ट्रीयस्तरे सम्मानितं भवितुं शक्ष्यते। यद्यपि हिमाचलप्रदेशे गते वर्षे 'राज्य-शिक्षक-पुरस्कार-२०२५' इत्यस्य क्षेत्रस्य विस्तारः कृतः आसीत्। प्रदेशसर्वकारेण विद्यालय-शिक्षकैः सहैव महाविद्यालयानां तान्त्रिकशिक्षणसंस्थानां च शिक्षकाः अपि राज्य-शिक्षक-पुरस्कारे सम्मिलिताः कृताः आसन्। अतः परम् अधुना राष्ट्रीयस्तरेऽपि ईदृशी व्यवस्था विहिता। 'राष्ट्रीय-शिक्षक-पुरस्कार-२०२६' इत्यस्य कृते अन्तर्जाल-नामाङ्कनप्रक्रिया (ऑनलाइन नामांकन) २६ मई दिनाङ्कात् प्रारब्धा अस्ति तथा च आवेदनस्य अन्तिमा तिथिः ५ जुलाई २०२६ निश्चिता कृता। अस्यामेव शृङ्खलायाम् उच्चशिक्षाविभागेन प्रदेशस्य सर्वेषां शासकीय-उपाधि-महाविद्यालयानां (सरकारी डिग्री कॉलेज) संस्कृतमहाविद्यालयानां च प्राचार्याः राष्ट्रीय-शिक्षक-पुरस्कार-२०२६ इत्यस्य कृते पात्रशिक्षकान् आवेदनार्थं प्रेरयितुं निर्देशिताः। **एते भविष्यन्ति पात्रता-नियमाः** पात्रशिक्षकाः नियमित-सङ्काय-सदस्याः भवेयुः। एतेन सहैव आवेदकानां पार्श्वे स्नातक-स्नातकोत्तरस्तरे न्यूनतमाः ५ वर्षाणाम् पूर्णकालिकः कार्य-अनुभवः भवितव्यः। आवेदनं कर्तुं अभ्यर्थिनाम् आहत्य अधिकतमं वयः ५५ वर्षाणाम् अपेक्षया अधिकं न भवेत्। अस्मिन् अन्तराले उच्चशिक्षणसंस्थानां वर्गे २५ पुरस्काराः (अवार्ड) प्रदास्यन्ते, यदा तु तान्त्रिकशिक्षाक्षेत्रे १० पुरस्काराः भविष्यन्ति।

# “सामाजिकसुरक्षापेंशनयोजनायाः अन्तर्गतं दशदिनाङ्कपर्यन्तम् अनिवार्यभुगतानं सुनिश्चितं भवतु” इति निर्देशः- सम्राटचौधरी



हिमसंस्कृतवार्ता:- राघव नाथ झा, पाटलिपुत्रम्।मुख्यमन्त्रिणः आवासस्थिते संकल्पसभागारे आयोजितायां समाजकल्याणविभागस्य उच्चस्तरीय- समीक्षासभायां सामाजिकसुरक्षा- पेंशनयोजनानां समयबद्धभुगतानं, आंगनबाड़ीकेन्द्राणां सुदृढीकरणं तथा कल्याणकारीयोजनानां प्रभावीक्रियान्वयनं प्रति महत्त्वपूर्णाः निर्देशाः प्रदत्ताः। समीक्षासभायाः अध्यक्षतां कुर्वन् मुख्यमन्त्री सम्राटचौधरीमहोदयः स्पष्टतया निर्देशितवान् यत् सामाजिकसुरक्षा- पेंशनयोजनानां अन्तर्गतं प्रत्येकमासस्य दशदिनाङ्कपर्यन्तं लाभार्थिनां बैंकखातेषु धनराशेः भुगतानं सर्वथा अनिवार्यतया सुनिश्चितं भवेत्, विलम्बः किमपि प्रकारेण न स्वीकर्तव्यः। मुख्यमन्त्रिणा उक्तं यत् आंगनबाड़ीकेन्द्रेषु प्रदीयमानानां सेवासु प्रौद्योगिक्याधारितं गहनं पर्यवेक्षणं करणीयं सेविकानां सहायिकानाञ्च शतप्रतिशतम् उपस्थितिः सुनिश्चितव्या। तेन प्रतिपादितं यत् आंगनबाड़ीकेन्द्राणां गुणवत्ता बालानां समग्रविकासेन प्रत्यक्षतया सम्बद्धा अस्ति, अतः तेषां संचालनविषये कापि शैथिल्यं न सहनीयम्। तेन राज्ये स्तम्भितवृद्धि- पोषणहीनता, क्षीणपोषणस्थितिः इत्येतयोः आँकडानां सुधारः सर्वोच्चप्राथमिकतासु अन्तर्भावनीयः इति प्रतिपादितम्। परवरिश- योजनासहितानां अन्यसामाजिकसुरक्षा- योजनानां विस्तारं कृत्वा अधिकाधिकान् पात्रलाभार्थिनः लाभान्वितान् कर्तुं निर्देशः प्रदत्तः। योजनानां लाभराशेः तथा क्षेत्रविस्तारस्य पुनरीक्षणं कर्तुम् अपि आदेशः दत्तः।मुख्यमन्त्रिणा समाजकल्याणविभागे रिक्तपदानां शीघ्रपूर्त्यै तथा आंगनबाड़ीकेन्द्राणां सुदृढीकरणाय निगम- सामाजिक- उत्तरदायित्वम् माध्यमेन सहयोगप्राप्त्याः सम्भावनाः अन्वेष्टव्या इति निर्देशः कृतः। तेन उक्तं यत् सर्वेषु आंगनबाड़ीकेन्द्रेषु नियमितं प्रभावी च संचालनं सुनिश्चितं भवेत्, येन लाभार्थिनः निर्धारितसेवाः समये एव प्राप्नुयुः। सर्वेषां योजनानां प्रभावीक्रियान्वयनं, पारदर्शिता तथा समयबद्धनिरीक्षणं प्रति विशेषबलं दत्तम्। राज्यस्य प्राथमिकता समाजस्य दुर्बलवर्गाणां वञ्चितवर्गाणां च यथार्थलाभप्राप्तिः अस्ति इति तेन प्रतिपादितम्। मुख्यमन्त्रिणा इदमपि उक्तं यत् जनकल्याणकारीयोजनानां प्रभावीक्रियान्वयनमेव जनजीवने वास्तविकपरिवर्तनं जनयति, अतः सर्वे विभागीयाधिकारिणः संवेदनशीलतया निष्ठया च स्वकर्तव्यं निर्वहन्तु। अस्यां समीक्षासभायां समाजकल्याणमन्त्री श्वेतागुप्ता, मुख्यमन्त्रिणः प्रधानसचिवः दीपककुमारः, मुख्यसचिवः प्रत्यय अमृतः, विकासायुक्तः मिहिरकुमारसिंहः, अपरमुख्यसचिवः एच. आर. श्रीनिवासः, सचिवगणाः, अन्ये वरिष्ठाधिकारिणः च उपस्थिताः आसन्।

# “क्षेत्ररक्षणाभियानेन कृषिचित्रं परिवर्तिष्यते, मृत्तिकास्वास्थ्यवर्धनं कृषकाणां च आयवृद्धिः भविष्यति” इति माननीयकृषिमन्त्रिणः विजयकुमारसिन्हस्य उद्घोषः




**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्।**राज्ये रासायनिकखाद्यानां सन्तुलितोपयोगस्य तथा प्राकृतिककृषेः प्रवर्धनार्थं “क्षेत्ररक्षणाभियानम्” इति नाम्ना नवोपक्रमः प्रारब्धः, यः जूनमासस्य त्रिंशत्- दिनाङ्कपर्यन्तं प्रवर्तिष्यते। मीठापुरस्थिते कृषिभवने माननीयकृषिमन्त्रिणा विजयकुमारसिन्हमहोदयेन कृषकसमुदायस्य सन्निधौ अस्याभियानस्य विधिवत् शुभारम्भः कृतः। अस्मिन् अवसरे बहुसंख्यकाः कृषकाः भागं गृहीत्वा स्वक्षेत्राणां चतुर्थांशभूमौ प्राकृतिककृषेः स्वीकारार्थं संकल्पं कृतवन्तः। कृषिमन्त्रिणा प्रतिपादितं यत् इदम् अभियानं केवलं कृषिकार्यक्रमः नास्ति, अपि तु धरित्रीमातुः स्वास्थ्यसंरक्षणाय तथा कृषकाणां भविष्यरक्षणाय च जनान्दोलनस्वरूपं वर्तते। प्राकृतिककृषेः अवलम्बनेन कृषकाः स्वपरिवारस्य स्वास्थ्यं तथा कृषिजन्यस्य आयस्य च उभयम् सुरक्षितं कर्तुं शक्नुवन्ति इति तेनोक्तम्। तेन उक्तं यत् गोमय- गोमूत्रादिभिः, जैविकसंसाधनैः च निर्मितं प्राकृतिकखाद्यं न केवलं मृत्तिकायाः उर्वरकत्वं वर्धयति, अपि तु फसलानां गुणवत्तां मानवस्वास्थ्यं च अनुकूलतया प्रभावितं करोति। कृषकाणां प्रति तेन आग्रहः कृतः यत् ते मृत्तिका- स्वास्थ्यपत्रकानुसारमेव सन्तुलितखाद्यानां प्रयोगं कुर्वन्तु। कृषिमन्त्रिणा उक्तं यत् “राष्ट्रीय- प्राकृतिक- कृषिमिशन” अन्तर्गतं राज्यस्य सर्वेषु अष्टत्रिंशत्-जनपदेषु समूहाधारित-प्राकृतिककृषेः प्रवर्धनं क्रियते। अस्याः योजनायाः अन्तर्गतं अष्टशतं “कृषिसख्यः” (जीविकादिद्यः) चयनिताः सन्ति, येभ्यः मासिकं पञ्चसहस्ररूप्यकं प्रोत्साहनधनं प्रदीयते। तेन इदमपि सूचितं यत् वित्तीयवर्षे २०२६-२७ मध्ये चतुर्दशाधिकशतं (११४) नवीनसमूहाः, पञ्चसप्ततिसहस्र- हेक्टेयरपरिमितं क्षेत्रं च योजनायां समावेशयिष्यते। प्राकृतिककृषेः अवलम्बनकर्तृभ्यः कृषकेभ्यः प्रतिएकड़ं चतुर्सहस्ररूप्यकं (अधिकतमम् एकैकड़पर्यन्तम्) प्रोत्साहनराशिः, जैवउत्पादन- संसाधनकेन्द्र- स्थापनाय च एकलक्षरूप्यकं सहाय्यं, प्रमाणीकरणार्थं प्रतिहेक्टेयरं द्विसहस्रैकशतरूप्यकं (२१००) च प्रावधानं कृतम्।अस्मिन् अवसरे कृषिविभागस्य प्रधानसचिवेन नर्मदेश्वरलालमहोदयेन उक्तं यत् प्राकृतिककृषि- व्यवस्थायां प्रकृतिः स्वयं पोषणकार्यं करोति, अतः रासायनिकनिर्भरता न्यूनीकरणं समयस्य आवश्यकता अस्ति। तेन कृषकाः वैज्ञानिक- परामर्शेन सह सन्तुलितकृषेः अवलम्बनाय प्रेरिताः। अधिकारिभिः उक्तं यत् इदम् अभियानं ग्रामग्रामं, पंचायतस्तरं च यावत् प्रसारितं भविष्यति। “न्यूनखाद्यम्, सम्यक् खाद्यम्, सम्यक् परामर्शः” इति सिद्धान्ताधारितायाः अस्याः योजनायाः उद्देश्यं न केवलं मृत्तिकागुणवत्तायाः संवर्धनम्, अपि तु कृषकाणां व्ययस्य न्यूनता कृत्वा तेषां आयवृद्धिः अपि अस्ति। अभियानकाले मृत्तिकापरीक्षणम्, मृत्तिकास्वास्थ्यपत्रकवितरणम्, हरितखाद्यप्रयोगः, फसलविविधीकरणम्, जलसंरक्षणम्, जलवायु- अनुकूलकृषिप्रविधयः इत्यादिषु विशेषबलं प्रदास्यते। कृषिवैज्ञानिकाः क्षेत्रस्तरं गत्वा कृषकेभ्यः व्यावहारिकमार्गदर्शनं प्रदास्यन्ति। इदम् अभियानं राज्ये सततकृषिविकासदिशि एकं महत्त्वपूर्णं पदं मन्यते, यतः आगामिषु कालेषु कृषिव्यवस्था अधिका दिग्धा, लाभप्रदा, पर्यावरणानुकूलतया च स्थास्यति इति अपेक्षा वर्तते।

## "लौकिकन्यायकोशः"

## "अभ्रमयूरन्यायः"

मेघान् दृष्ट्वा मयूराः नृत्यन्ति। मेघैः सह मयूराणां कः सम्बन्धः इति न ज्ञायते। परन्तु वर्षर्तोः आरम्भे मेघान् दृष्ट्वा ते नृत्यन्ति इति सत्यम् एव। तथैव कमपि जनं किञ्चिद् वस्तु वा दृष्ट्वा कस्यचिद् मनुष्यस्य महान आनन्दः भवति। तादृशस्य आनन्दस्य वर्णनम् अनेन न्यायेन क्रियते। महाकवि कालिदास एतेषां मयूराणां हर्षस्य वर्णनम् एवं कृतवान्-

**सदा मनोज्ञं**
**स्तनदुत्सवोत्सुकं**
**विकीर्णविस्तीर्ण**
**कलापशोभितम्।**
**ससंभ्रमालिङ्गनचुम्बा**
**नाकुलं प्रवृत्तनृत्यं**
**कुलमद्य बर्हिणाम्।।**
(ऋतुसंहारः २-६)

**डा. वर्षा प्रकाश**
**टोणगांवकर**
**पुणे / महाराष्ट्रम्**

## हास्यकणिका

पत्नी- वदतु, अहं सुन्दरी अस्मि अथवा बुद्धिमती 😍
पतिः- त्वं न सुन्दरी असि न तु बुद्धिमती।
पत्नी- किमर्थम् 🤔
पतिः- यदि त्वं सुन्दरी अभविष्यः, तर्हि मया सह तव विवाहः न अभविष्यत्। यदि त्वं बुद्धिमती अभविष्यः, तर्हि त्वं मया सह विवाहं न अकरिष्यः। 😋
पत्नी - 🥴 😖

## हास्यकणिका

पतिः- किं कदापि तव पश्चात्तापः अभवत्?
पत्नी- आम्, मम पश्चात्तापः अभवत् 😔
पतिः- कस्य विषयस्य?
पत्नीः कलहसमये याः वाचः वक्तव्याः आसन्, ताः पश्चात् स्मरामि। चिन्तयामि यत् यदि ताः कलहसमये वदति स्म, तर्हि भवतः मुखं पिहितम् भवति स्म 😜
पतिः 🥴 😖

# मिथिलाक्षेत्रे फुलहरग्रामे बौद्धदेव्याः तारायाः दुर्लभप्राचीनप्रतिमायाः प्राप्तिः, मिथिला- ललित- संग्रहालयाय विधिवत् समर्पणम्



**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्।** मधुबनीजनपदस्य ऐतिहासिक- सांस्कृतिक- महत्त्वसम्पन्ने फुलहरग्रामे बागतडागपुष्करिण्याः उडाहीकर्मणि मिथिलाक्षरलिप्यांकित-खण्डिता बौद्धदेवीतारायाः दुर्लभप्राचीनप्रतिमा तथा कैथीलिप्यां लिखितः एकः धातुनिर्मितः पुरातत्त्वावशेषश्च प्राप्तौ। उभौऽपि पुरावशेषौ ऐतिहासिक- पुरातात्त्विकमहत्त्वेन सम्यक् संरक्ष्य अध्ययनार्थं प्रदर्शनार्थं च सौराठस्थिताय मिथिला- ललित- संग्रहालयाय विधिवत् समर्पितौ। जिलाप्रशासनेन तत्क्षणमेव सूचना-प्राप्तिमात्रेणैव विषयः गम्भीरतया गृहीतः, तयोः पुरावशेषयोः संरक्षणार्थं त्वरितप्रक्रिया प्रारब्धा। अस्मिन् कार्ये श्रीसीतारामजीभगवतः समितेः सदस्याः, हरलाखीप्रखण्डस्य प्रखण्डविकासपदाधिकारी, ललितनारायण- मिथिला- विश्वविद्यालयस्य दरभङ्गास्थस्य प्राचीनभारतीयइतिहास- पुरातत्त्व- संस्कृतिविभागस्य शोधार्थी मुरारीकुमारझामहोदयः उपस्थिताः आसन्। तेषां सन्निधौ एतौ पुरावशेषौ जिलाकलासंस्कृतिपदाधिकारी-सह-संग्रहालयाध्यक्षाय विधिवत् समर्पितौ। स्थलनिरीक्षणकाले शोधार्थिना मुरारीकुमारझामहोदयेन प्रतिपादितं यत् बागतडागपुष्करिण्याः पश्चिमभागात् प्राप्ता इयं प्रतिमा अत्यन्तमहत्त्वपूर्णं पुरातात्त्विकसाक्ष्यं वर्तते। तेनोक्तं यत् प्राप्तमृद्भाण्डावशेषाः अस्यां भूमौ प्राचीनकाले विकसित-मानवबस्तिः अथवा धार्मिककेन्द्रम् आसीत् इति सूचयन्ति। प्रारम्भिकानुमानेन इदं स्थलम् एकादश-द्वादशशताब्द्याः कालखण्डे समृद्धं सांस्कृतिक- धार्मिककेन्द्रम् आसीदिति परिगण्यते। तेन इदमपि प्रतिपादितं यत् स्थले दृष्टाः दग्धमृत्तिकावशेषाः सम्भवतः प्राचीनचूल्हसम्बद्धाः अथवा यज्ञसंस्कृतिसम्बद्धाः स्युः, येन अस्य क्षेत्रस्य धार्मिक- सामाजिकक्रियाकलापानां सक्रियता सूच्यते। अतः अस्मिन् क्षेत्रे वैज्ञानिक- नियन्त्रितपुरातात्त्विक- उत्खननस्य आवश्यकता विशेषतया प्रतिपादिता।जिला- कलासंस्कृति- पदाधिकारी- सह- संग्रहालयाध्यक्षेन उक्तं यत् इयं प्रतिमा बौद्धधर्मस्य देव्या तारायाः अस्ति, यस्यां मिथिलाक्षरलिप्यां बौद्धमन्त्राः अपि उत्कीर्णाः सन्ति। अतः अस्याः ऐतिहासिक-धार्मिक- शैक्षणिकमहत्त्वं विशेषतया वर्धते। तेनोक्तं यत् संग्रहालये अस्याः सुरक्षितसंरक्षणं कृत्वा तस्याः कलाशैली, कालनिर्धारणं तथा सांस्कृतिकपृष्ठभूमिः इत्यादिषु विषयेषु विस्तृतम् अनुसन्धानं कारयिष्यते।इण्डियन- नेशनल- ट्रस्ट- फॉर- आर्ट- एण्ड- कल्चरल- हेरीटेज (INTACH) बिहार इत्यस्य सहसंयोजकः डॉ. शिवकुमारमिश्रः इमां घटनां मिथिलायाः सांस्कृतिकधरोहरसंरक्षणदिशि महत्त्वपूर्णाम् उपलब्धिं मन्यते। तेनोक्तं यत् इयं प्राप्तिः मिथिलायाः बौद्ध-सांस्कृतिक-इतिहासे नवीनान् आयामान् योजयति, क्षेत्रस्य ऐतिहासिकसमृद्धेः सशक्तं प्रमाणं प्रस्तुतं करोति।स्थानीयजनाः श्रीसीतारामजीभगवतः समितेः सदस्याश्च अस्याः प्रतिमायाः संग्रहालयाय समर्पणेन प्रसन्नतां प्रकटितवन्तः। तैः इदं कार्यं धरोहरसंरक्षणदिशि प्रशंसनीयम् उत्तरदायित्वयुक्तं च इति वर्णितम्। इयम् उपलब्धिः मिथिलाक्षेत्रस्य समृद्धां सांस्कृतिक- धार्मिक- ऐतिहासिकपरम्परां पुनः प्रकाशयन्ती महत्त्वपूर्णा कडी इति मन्यते, यस्याः आधारेण क्षेत्रस्य पुरातात्त्विकइतिहासः नूतनां दिशं प्राप्नुयात् इति अपेक्षा वर्तते।

# वर्षाकाल–२०२६, पूर्वसज्जताविषये उच्चस्तरीयसमीक्षासभा सम्पन्ना:

## जलावरोधमुक्त- नगरनिर्माणाय सुदृढकार्ययोजनायाः क्रियान्वयने विशेषबलप्रदानम्



**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्।** बिहारराज्यस्य नगरविकासावासविभागस्य माननीयमन्त्रिणः नीतीशमिश्र-महोदयस्य अध्यक्षतायामद्य विभागीयसभागारे वर्षाकाल– २०२६ पूर्वसज्जतासम्बद्धा उच्चस्तरीया समीक्षासभा सम्पन्ना। अस्यां सभायां पाटलिपुत्रनगरनिगमस्य, दानापुरनगरपरिषदः, फुलवारीशरीफ-, खगौल- सम्पतचकक्षेत्राणां च सम्भाव्य-जलावरोधस्य, नालिकाशोधनकार्यस्य, जलनिर्गमनव्यवस्थायाः, उदकनिष्कासनयन्त्राणां सञ्चालनस्य, यान्त्रिकोपकरणानां मानवसंसाधनानाञ्च उपलब्धेः विस्तृतसमीक्षा कृता। माननीयमन्त्रिणा निर्दिष्टं यत् गतवर्षीयानुभवानां प्राप्तनिष्कर्षाणाञ्च आधारेण अस्मिन् वर्षे जलावरोधसमस्यायाः स्थायिसमाधानार्थम् अद्यावधि सम्पन्नकार्याणां पूर्वसज्जतानाञ्च सम्यक् प्रतिवेदनं प्रस्तुत्यताम्। विगतमासे सम्पन्नकार्याणां विस्तृतविवरणमपि समर्पणीयमिति निर्देशः प्रदत्तः।

मन्त्रिणा स्पष्टतया प्रतिपादितं यन्नागरिकाः कस्यामपि परिस्थितौ जलावरोधजनितां बाधां न अनुभवेयुः। एषा विभागस्य सर्वोच्चप्राथमिकता वर्तते। यदि कस्यचन अधिकारिणः प्रमादेन शैथिल्येन वा जनसामान्यस्य क्लेशः सम्पद्यते तर्हि तस्य उत्तरदायित्वनिर्धारणं कृत्वा नियमानुसारिणी कार्यवाही अवश्यमेव विधास्यते। आपत्कालीन- त्वरितप्रतिक्रिया- दलस्य पूर्णसशक्तीकरणार्थं मन्त्रीमहोदयेन निर्देशाः प्रदत्ताः। सर्वेभ्यः कर्मिभ्यः सुरक्षोपकरणसमूहः, वर्षारक्षकवस्त्राणि, उपयुक्तपादत्राणानि च प्रदीयन्ताम्, येन ते प्रतिकूलवातावरणेऽपि स्वकर्तव्यं सम्यग्रूपेण निर्वोढुं शक्नुयुः।

भूमिगतजलनिकासमार्गाणां शोधनकार्ये अत्याधुनिकप्रौद्योगिक्याः प्रयोगः शीघ्रं क्रियान्वितव्य इति विशेषतया निर्दिष्टम्। तथैव बृहत्नालिकानां अपूर्णसंयोजनस्थलानि चिह्नीकृत्य समयबद्धरूपेण सम्पूरणीयानि, उदकनिष्कासन- यन्त्राणां संख्या कार्यक्षमता च वर्धनीया, उद्घाटितनालिकानां प्रत्यक्षस्थलीयनिरीक्षणं च सुनिश्चितीकरणीयमिति निर्देशः प्रदत्तः। कार्येषु पारदर्शिताया उत्तरदायित्वबोधस्य च संवर्धनार्थं स्थानाङ्कनयुक्त-छायाचित्रमाध्यमेन सततानुश्रवणव्यवस्था विकसितव्या इति बलं दत्तम्। मन्त्रीमहोदयेन पर्यवेक्षणप्रक्रियायाः सुदृढीकरणं नियमितनिरीक्षणं सततानुश्रवणञ्च अनिवार्यमिति प्रतिपादितम्। जनहितसम्बद्धेषु कार्येषु किमपि शैथिल्यं न सहनीयमिति स्पष्टतया उक्तम्। ग्रामपञ्चायतक्षेत्रेभ्यः नगरक्षेत्रेषु निवासार्थमागच्छद्भ्यः जनेभ्यः गुणवत्तासम्पन्नानां नागरिसुविधानां प्रदायनं विभागस्य नैतिकम् प्रशासनिकं च दायित्वमस्ति। अतः सर्वे अधिकारिणः संवेदनशीलतया तत्परतया उत्तरदायित्वबोधेन च स्वकर्तव्यनिर्वहणे संलग्ना भवन्तु। अस्यां समीक्षासभायां सहकारितामन्त्री रामकृपालयादवः, विभिन्नविधानसभाक्षेत्राणां जनप्रतिनिधयः, नगरविकासावासविभागस्य प्रधानसचिवः, विविधनिगमसंस्थानां प्रबन्धनिदेशकाः, पाटलिपुत्रनगरनिगमस्य महापौरा, नगरायुक्तः, उपमहापौराः, विभागस्य अन्ये वरीयाधिकारिणः च उपस्थिताः आसन्।



# वार्ता-संवादः

**नन्दिनी-** नमो वः। गतदिनेतने वार्ता-कार्यक्रमे भवतां स्वागतम्। नमस्ते काव्ये। गतदिनेमया एका विचित्रा वार्ता पठिता। स्विट्जरलैंडदेशात् एकेन भारतीयेन यात्रिणा सार्ध-लक्ष-रूप्यकाणां मार्गदण्डः प्राप्तः। एषा यात्रा तेन एकवर्षात् पूर्वं कृता आसीत्, परन्तु दण्डपत्रं सम्प्रति प्रेषितम्।

**काव्या-** नमस्ते नन्दिनि! मया अपि एषा वार्ता श्रुता। तेन यात्रिणा महाविस्मयः अनुभूतः स्यात्। नियमभङ्गस्य दण्डः तु दातव्यः एव, परन्तु वर्षानन्तरं दण्डप्राप्तिः अतीव विचित्रा! अस्तु, इदानीं द्वितीया अपूर्वा वार्ता कजाकिस्तानदेशात् प्राप्ता। तत्र आकाशवाहनानां वैधीकरणाय व्यवस्थापिका- सभया नवीनं विधेयकं स्वीकृतम्।

**नन्दिनी-** सत्यम्! मया अपि एतत् पठितम्। आकाशे उत्पतन्तः एते 'आकाश-सारथयः' अतीव रोचकाः दृश्यन्ते। अनया व्यवस्थया जनानां यात्रासमयः रक्षितः भविष्यति।

इतः परं तृतीया आश्चर्यमयी वार्ता प्राप्ता। स्पेनदेशं प्रति प्रस्थितं विमानं केवलम् एकस्य ब्लूटूथयन्त्रस्य सन्दिग्धनाम्ना मार्गमध्ये प्रतिवर्तितम्।

**काव्या-** एतद् अपि मया पठितम्। यात्रिभिः अतीव भयं प्राप्तं स्यात्। केवलं नाम्ना विमानस्य प्रतिवर्तनं सर्वथा आश्चर्यकरम्।

अस्तु, चतुर्थी भयङ्करा वार्ता अमेरिकादेशात् प्राप्ता। तत्र एकः गुप्तचर-संस्था-समर्थितः संशोधकः अमेरिकादेशस्य वशे चतुर्विधाः परग्रहवासिनां देहाः सन्ति इति कथितवान् अस्ति।

**नन्दिनी-** सत्यम्! परग्रहवासिनां विषये मया अपि एतत् पठितम्। यदि एतत् सत्यं तर्हि अस्माकं ब्रह्माण्डे वयं न एकाकिनः इति सिद्धं भविष्यति। एषा वार्ता रोमाञ्चिका अस्ति। गतदिनेतनं वार्ता-पत्रम् अत्रैव समाप्तम्। श्वः पुनः मिलामः। धन्यवादः।

# हासपरिहासम्

पत्नी- चौर्यं करोति यः मनुष्यः कदापि सुखी न भवति।
पतिः- त्वया मम हृदयं चोरितम्, तत्?
पत्नी- अहं सुखी दृश्यामि किम्
पतिः



## राज्यपाल-सह-कुलाधिपतिना उच्चशिक्षायाः गुणवत्ता-परिष्कारायः निर्णायकः निर्देशः दत्तः – २११ नूतन-उपाधि-महाविद्यालयानां २०२६ तमवर्षस्य जुलै-मासस्य प्रथमे दिनाङ्के आरम्भस्य लक्ष्यनिर्धारणम्

बिहारराज्यस्य उच्चशिक्षाव्यवस्थायां व्यापकपरिवर्तनस्य दिशि महत्त्वपूर्णः प्रयासः दृश्यते। राज्यपाल-सह-कुलाधिपतिना चमूपति-महाभागेन (विश्रामप्राप्तेन) सैयद अता हसनैन महोदयेन सोमवासरे बिहारलोकभवने राज्यस्य समस्तेषाम् विश्वविद्यालयानां कुलपतिभिः सह उच्चस्तरीया समीक्षा-सभा आयोजिता।अस्मिन् अवसरे राज्यपालेन स्पष्टतया निर्देशः दत्तः यत् विश्वविद्यालयानां मूल्याङ्कनं केवलं भवन-संरचना, नामाङ्कन-संख्या अथवा सांख्यिकीय-आधारेषु न भविष्यति, अपि तु शिक्षणगुणवत्ता, अनुसन्धान-स्तरः, परीक्षा-प्रणाली, महिला-सुरक्षा तथा छात्रसन्तुष्टिः इत्येतेषाम् आधारभूत-मापदण्डानाम् आधारे एव सम्पूर्णं मूल्याङ्कनं क्रियेत।सभायां 'सप्तनिश्चय-तृतीय' कार्यक्रमान्तर्गतम् स्थापनीयाः २११ नूतन-उपाधि-महाविद्यालयाः (डिग्री-कॉलेज) २०२६ तमवर्षस्य जुलै-मासस्य प्रथमे दिनाङ्के (१ जुलै ततः) शैक्षणिक-क्रियाकलापान् प्रारभेरन् इति लक्ष्यं निर्धारितम्। तदर्थं भूम्युपलब्धिः, भवन-निर्माणम्, आधारभूत-संरचना-विकासः तथा शिक्षक-नियुक्ति-प्रक्रिया 'अभियान-रूपेण' शीघ्रतया पूर्णा कर्तव्या इति निर्देशः दत्तः।नूतन-महाविद्यालयाः प्रखण्ड-मुख्यालयानां समीपे एव स्थापनीयाः इति विशेषतया बलं दत्तम्, येन ग्रामीण-विद्यार्थिनः उच्चशिक्षायै दूरगमनस्य बाधां न अनुभवेयुः। राज्यपालेन उक्तं यत् विश्वविद्यालयेषु केवलं उपाधि-प्रदानं न, अपि तु गुणवत्तायुक्त-शिक्षण-व्यवस्था एव प्रमुखं लक्ष्यं भवितव्यम्। तदर्थं योग्यानाम् अंशकालिक-शिक्षकाणां समयबद्धा नियुक्तिः तथा कक्षानिरीक्षणस्य नियमित-व्यवस्था अनिवार्या इति निर्देशः कृतः। छात्रैः सह नियमित-संवादस्य माध्यमेन तेषां समस्यानां समाधानं प्राथमिकतया करणीयम् इति अपि सः अवदत्।उच्चशिक्षायां उत्कृष्टता-स्वस्थ-प्रतिस्पर्धयोः संवर्धनाय 'कुलाधिपति-पुरस्कारः' प्रारम्भस्य संभावना प्रकटिता। एषः पुरस्कारः शैक्षणिक-उपलब्धये, नवाचाराय तथा उत्कृष्ट-शिक्षण-कार्याय प्रदेयः भविष्यति।महिला-सुरक्षायै सर्वोच्चा प्राथमिकता दत्ता। सर्वेषु विश्वविद्यालयेषु महाविद्यालयेषु च 'आन्तरिक-याचिका-समितिः' (आन्तरिक-शिकायत-समितिः) अनिवार्यत्वेन गठनीया इति निर्देशः दत्तः, येन छात्राणां तथा महिला-कर्मचारिणां कृते सुरक्षितं सम्मानपूर्णं च वातावरणं सुनिश्चितं भवेत्। परीक्षा-प्रणाल्याः पारदर्शितां तथा कदाचार-मुक्तताम् प्रति अपि विशेषं बलं दत्तम्। परीक्षा-सारण्याः (कैलण्डरस्य) पालनम्, समयबद्ध-मूल्याङ्कनम् तथा शीघ्र-परिणाम-प्रकाशनम् अनिवार्यत्वेन निर्दिष्टम्। अनुसन्धान-तथा-सङ्गणकीय-(डिजिटल)-शिक्षा-विस्ताराय अपि महत्वपूर्णाः निर्देशाः दत्ताः। विद्यावाचस्पति-(पीएच.डी.) कार्यक्रमेषु 'विश्वविद्यालय-अनुदान-आयोगस्य' (यूजीसी) मानकानां पालनम्, 'आचार्य-विकास-कार्यक्रमः', 'सङ्चना-पुस्तकालय-जालस्य' (INFLIBNET) अन्तर्जाल-ग्रन्थागारस्य अधिकतमोपयोगः तथा विद्यार्थिनां सङ्गणकीय-संसाधनैः सह सम्यक् संयोजनं करणीयम् इति उक्तम्।ततश्च वित्तीय-अनुशासनस्य सुदृढीकरणम्, शिक्षक-कर्मचारिणां वेतन-सेवानिवृत्ति-लाभानां समये प्रदानम् तथा 'समर्थ-जालद्वार' (समर्थ-पोर्टल) प्रणाली-कार्यान्वयनस्य तीव्रता प्रति अपि निर्देशः दत्तः।राज्यपालेन 'विश्वविद्यालय-संसदः' (सीनेट) तथा 'प्रबन्ध-समित्याः' (सिण्डिकेट) व्यवस्थानाम् अधिक-प्रभावशीलतायै, उत्तरदायित्वपूर्णतायै तथा परिणामोन्मुखतायै बलं दत्तम्। अन्यराज्यानां श्रेष्ठ-शैक्षणिक-प्रथाभ्यः शिक्षाग्रहणस्य आवश्यकता अपि प्रतिपादिता।अस्मिन् उच्चस्तरीये समागमे उच्चशिक्षामन्त्री संजय सिंह टाइगर, मुख्यसचिवः प्रत्यय अमृतः, राज्यपालस्य अपरमुख्यसचिवः दीपक कुमार सिंहः, उच्चशिक्षा-विभागस्य सचिवः राजीव रौशनः, निदेशकः आचार्यः एन. के. अग्रवालः, बिहार राज्य विश्वविद्यालय सेवा आयोगस्य अध्यक्षः आचार्यः गिरीश कुमार चौधरी इत्येतैः सहिताः सर्वे विश्वविद्यालय-कुलपतयः वरिष्ठाधिकारिणश्च उपस्थिताः आसन्।

## 'चिट्टा-आइस' इति मादकद्रव्य-आपूर्ति-तन्त्रस्य विवृतिकरणम्; मुख्यप्रदाता पञ्जाबराज्यतः निगृहीतः

हिमसंस्कृतवार्ताः - शिमला। शिमला-आरक्षकदलेन (पुलिस) मादकद्रव्यतस्करीं विरुद्धं सञ्चालिते अभियाने महती सफलता प्राप्ता। दलेन मादकद्रव्याणां आपूर्तितन्त्रात् (सप्लाई नेटवर्क) सम्बद्धः एकः प्रमुखः अभियुक्तः पञ्जाबस्य खरड़-क्षेत्रात् निगृहीतः (गिरफ्तार)। आरक्षकदलेन अस्यां कार्यविधौ भूरिमात्रायां हेरोइन् (चिट्टा), आइस (मेथामफेटामाइन) तथा च रोधमुद्रा (नकदी) प्राप्ता। ढली-आरक्षकस्थानके २९ मई २०२६ दिनाङ्के एन्.डी.पी.एस.-अधिनियमस्य (NDPS Act) २१ एवं २९ धारा-अन्तर्गतं प्रकरणं पञ्जीकृतम् आसीत्। आरक्षकदलेन गुप्ता सूचना प्राप्ता आसीत् यत् ढली-चतुष्पथात् (चौक) समीपे एकस्मिन् गृहे मादकद्रव्याणि स्थापितानि सन्ति। सूचनायाः आधारेण आरक्षकदलेन स्वतन्त्रसाक्षिणाम् उपस्थितौ अन्वेषण-अभियानम् (तलाशी) चालितम्।अन्वेषणकाले १९ वर्षीया अवन्तिकानेगी (निवासिनी ढली) तथा २० वर्षीयः प्रद्युम्नः (निवासी ठियोग) द्वयोः आधिपत्यतः प्रायः ६५ ग्राममितं हेरोइन् (चिट्टा) तथा २० ग्राममितं आइस (मेथामफेटामाइन) प्राप्तम्। अस्य प्राप्यन्तरं उभौ अभियुक्तौ निगृह्य न्यायालये प्रस्तौतौ, यतः तौ २ जून २०२६ पर्यन्तं आरक्षक-अभिरक्षायां (पुलिस रिमांड) प्रेषितौ। गवेषणाकाले आरक्षकदलेन पृच्छा-तान्त्रिकविश्लेषण-पृष्ठसम्बद्धतायाः (बैकवर्ड लिंकेज) आधारेण ज्ञातं यत् उभौ अभियुक्तौ एतं समूहं (खेप) पञ्जाबस्य खरड़-क्षेत्रात् 'समर' नामकजनतः आनीतवन्तौ आस्ताम्। अतः परं आरक्षकदलेन त्वरितकार्यविधौ मुख्यप्रदाता समरसिंहः उर्फ टाइगरः खरड़-नगरात् निगृहीतः।

निगृहीतः अभियुक्तः समरसिंहः उर्फ टाइगरः फिरोजपुर-जनपदस्य निवासी अस्ति तथा च सम्प्रति खरड़-नगरस्य शिवालिक-अपार्टमेंट्स मध्ये वसन् आसीत्। आरक्षकदलेन तस्य आधिपत्यात् प्रायः १३१ ग्राममितं हेरोइन् (चिट्टा), २७ ग्राममितं आइस (मेथामफेटामाइन) तथा ६०,४०० रूप्यकाणां रोधमुद्रा प्राप्ता कृता। अस्मिन् प्रकरणे अधुना यावत् कुलाहत्य १९६ ग्राममितं हेरोइन् (चिट्टा), ४७ ग्राममितं आइस (मेथामफेटामाइन) तथा ६०,४०० रूप्यकाणि नकदधनं प्राप्तानि सन्ति। अभियुक्तः समरसिंहः अपि न्यायालये उपस्थाप्य २ जून २०२६ पर्यन्तं आरक्षक-अभिरक्षायां गृहीतः अस्ति। अपरपक्षे, एस्.एस्.पी. (SSP) शिमला गौरवसिंहः अवदत् यत् प्रकरणस्य जाञ्च प्रचलन्ती अस्ति। तेन संसूचितं यत् वर्षे २०२६ मध्ये मादकद्रव्यतस्करीप्रकरणेषु पृष्ठसम्बद्धता-जाञ्चयाः आधारेण सम्प्रति ४३ अभियुक्ताः निगृहीताः अभवन्। शिमला-आरक्षकदलस्य कथनं वर्तते यत् तत् केवलं मादकद्रव्याणां प्राप्त्या एव सीमितं नास्ति, अपितु तेषाम् मूलस्रोतः सम्पूर्णां प्रदायशृङ्खलां च संचिह्न्य तस्याः विरुद्धं प्रभावशालिकार्यवाह्यै निरन्तरं कार्यं करोति।

## जनगणना २०२७ - हिमाचले स्वगणनायाः शुभारम्भः, राज्यपालः कवीन्द्रगुप्तः अकरोत् औपचारिकप्रारम्भम्

हिमसंस्कृतवार्ताः - शिमला। राज्यपालः कवीन्द्रगुप्तः हिमाचलप्रदेशे जनगणना-२०२७ इत्यस्याः प्रथमचरणाय सोमवासरे लोकभवनतः स्वगणनायाः (Self Enumeration) औपचारिकं प्रारम्भम् अकरोत्। एतद् अभियानं १ जून तः १५ जून पर्यन्तं सम्पूर्णराज्ये सञ्चालिष्यते। राज्यव्यापी-अभियानस्य शुभारम्भं कुर्वन् राज्यपालः कवीन्द्रगुप्तः स्वकीयां स्वगणनां पूर्णं कृतवान्। अस्मिन् अवसरे जनगणनाकार्यनिदेशालय-हिमाचलप्रदेशस्य निदेशिका दीपशिखाशर्मा सहित विभागस्य अन्ये वरिष्ठाः अधिकारिणः अपि उपस्थिताः आसन्। ते राज्यपालं अस्याः अङ्कीयप्रक्रियायाः (डिजिटल प्रक्रिया) सूक्ष्मतथ्यैः अवगतं कारितवन्तः।

स्वगणना-जालाधारे (पोर्टल) स्वपक्षतः राज्यपालः प्रदेशवासिनां नाम्नि सन्देशं प्रसार्य जनगणनायाः महत्त्वे विशेषं प्रकाशं प्रक्षिप्तवान्। तेन कथितं यत् जनगणना केवलं नागरिक-अङ्कनानां सङ्ग्रहः नास्ति, अपितु एषा राज्यस्य भाविविकासस्य लोककल्याणकारीयोजनानां च निर्माणस्य आधारशिला वर्तते। सः अवदत् यत् प्रदेशस्य प्रत्येकः नागरिकः अस्मिन् राष्ट्रियकार्ये स्वसहभागितां निश्चितां कुर्यात्। सः राज्यस्य जनतां प्रति प्रार्थनाम् अकरोत् यत् १ तः १५ जून पर्यन्तं स्वयं पुरतः आगत्य स्वगणनायाः प्रक्रियां सोत्साहं पूरयन्तु।कवीन्द्रगुप्तः नागरिकेभ्यः विशेषम् अनुरोधं कृतवान् यत् स्वगणनाप्रक्रियायाः साफल्येन पूर्त्यै परं जालपुटतः प्राप्यमाणाम् 'स्वगणना-आईडी' (स्वगणना-पहिचान-सङ्ख्यां) सुरक्षितां स्थापयन्तु। अतः परं आगामिनि १६ जून तः १५ जुलाई २०२६ अवधौ यदा प्रगणकाः जनानां गृहाणि गमिष्यन्ति, तदा तेभ्यः एताम् 'स्वगणना-आईडी' अवश्यं ददतु, येन जनगणनायाः कार्यं सुगमतया सम्पन्नं भवितुं शक्नुयात्। सः प्रदेशस्य सर्वान् नागरिकान् एतां डिजिटल-प्रारम्भम् (अङ्कीयप्रयासम्) सफलं कर्तुं हिमाचलप्रदेशस्य विकासे च स्वकीयं बहुमूल्यं योगदानं प्रदातुम् आह्वानं कृतवान्।

### सत्यां सूचनां दास्यन्ति तदैव प्राप्स्यन्ति योजनानां सम्यग् लाभम्

राज्यपालः प्रदेशवासिभ्यः संप्रार्थितवान् यत् ते स्वगणनायां सत्यां सूचनां उपकल्पयन्तु, येन च यः कूटः (कोड) जनितः भविष्यति तेन संपूर्णां सूचनां प्राप्तुं शक्ष्यते। तेन प्रतिपादितं यत् केन्द्र-प्रदेशसर्वकारयोः अनेकाः ईदृश्यः योजनाः सन्ति याः साक्षात् जनैः सह सम्बद्धाः सन्ति, यदि च जनाः सत्यां सूचनां दास्यन्ति तर्हि भविष्ये तेन स्वसहभागितामपि निश्चितां कर्तुं शक्ष्यन्ति तथा च तासां योजनानां सम्यग् लाभमपि प्राप्तुं शक्ष्यन्ति। अतः, स्वगणनायाः कार्यं प्राथमिकतायाः आधारेण करणीयम् आवश्यकं वर्तते। सः अवदत् यत् वर्षे २०११ इत्यस्य जनगणनायाः परं यानि कार्याणि लम्बितानि (रुका हुआ) आसन्, तेषाम् लाभोऽपि अस्याः जनगणनायाः प्राप्तुं शक्ष्यते तथा च सत्याः अङ्कनाः अपि प्राप्स्यन्ते। तेन कथितं यत् हिमाचलप्रदेश-जम्मूकाश्मीर-उत्तराखण्डराज्येषु अधिकांशभागाः हिमाच्छादितः (स्नो-बाउंड) अस्ति, अतः अत्र अस्य कार्यस्य कृते प्राथमिकता प्रदत्ता अस्ति।